# श्रीमद् भागवत रसिक कुटुंब

## बाल गोपाल अष्टकम्

तीरपयोनिधि वृक्षनिवासं(म्),
हास्य कटाक्षय वं(म्)शीनि नादं(म्)।
श्य़ामल सुन्दर नित्य विलासं(न्),
तं(म्) प्रणमामि च बालगोपालम् ॥1॥

गोधन पालक गोपकुमारं(ञ्),
चन्दन चर्चित कुङ्कुमभारं(म्)।
नील कलेवर शोभित हारं(न्),
तं(म्) प्रणमामि च बालगोपालम् ॥2॥

गो गिरि धारण मेदिनि त्राणं(ङ्),
काम्य मनोरथ सिद्धि प्रदानं(म्)।
श्री यदुनन्दन हर मे पापं(न्),
तं(म्) प्रणमामि च बालगोपालं(म्) ॥3॥

श्री मधुसूदन बाल्य चरित्रं(ङ्),
काम्य मनोहर वेश विचित्रं(म्)।

यशोदानन्दन सुन्दर कृष्णं(न्),
तं(म्) प्रणमामि च बालगोपालम् ॥4॥

केलि कुतुहलि छन्न विवादं(ङ्),
केशव यामिनी पतित निनादं(म्)।
मल्ल निपातित मृष्टिक घातं(न्),
तं(म्) प्रणमामि च बालगोपालम् ॥5॥

कं(म्)स निशूदन केशि निनाशं(न्),
ताल फलेषुच धेनुका नाशं(म्)।
देवकी नन्दन सुन्दर कृष्णं(न्),
तं(म्) प्रणमामि च बालगोपालम् ॥6॥

उज्ज्वल पङ्कज बाहु मृणालं(लँ),
लक्ष्मी सरस्वती सेवित पादं(म्)।
श्री यदुनन्दन हर मे पापं(न्),
तं(म्) प्रणमामि च बालगोपालम् ॥7॥

यादव माधव केशव शौरे,
श्रीधर सुन्दर कृष्ण मुरारे।
तारय तारय हर मे पापं(न्),
तं(म्) प्रणमामि न बालगोपालम् ॥8॥

॥ इति श्री बालगोपालाष्टकम् सम्पूर्णं ॥